## अध्याय :- १२ chapter-12

नारद उवाच ।।[१]
अथ ते ददृशुः पार्थ संयमस्थं महामुनिम् ।।
क्रियायोगसमायुक्तं तपोमूर्तिधरं यथा ।। १

जयस्त्रिवर्णस्नान कपिलाः शिरसा तदा ।।
धारयन्तं लोमशाख्यमाज्यसिक्तमिवानलम् ।। २

सव्यहस्ते तृणौघं च च्छ्यार्थं विप्रसत्तमम् ।।
दक्षिणे चाक्षमालां च बिभ्रतं मैत्रमार्गगम् ।। ३

अहिंसयन्दुरुक्ताद्यैः प्राणिनो[२] भूमिचारिणः[३] ।।
यः सिद्धिमेति जप्येन स मैत्रो मुनिरुच्यते ।। ४

बकभूप द्विजोलूक गृध्रकूर्मा विलोक्य च[४] ।।
नेमुः कलापग्रामे तं चिरंतन तपोनिधिम् ।। ५

स्वागतासनसत्कारेणामुना तेऽति सत्कृताः[५] ।।
यथोचितं प्रतीतास्तमाहुः कार्यं त्वदृदिस्थितम् ।। ६

कूर्म उवाच ।।
इन्द्रद्युम्नोऽयमवनीपतिः सत्रिजनाग्रणीः ।।
कीर्तिलोपान्निरस्तोयं वेधसानाकपृष्ठतः ।। ७

---

१ ब. श्रीनारद उ० ।।
२ अ. नां
३ अ. धुम्रचारिणां
४ अ. ब. " तं "
५ अ. नंदिताः

मार्कंडेयादिभिः प्राप्य कीर्त्युद्धारं च सत्तम् ॥
नार्यञ्च काम्यते स्वर्गं पुनः पातादिभीषणम् ॥ ८

भवतानुगृहीतोऽयमिहेच्छति महीदमम् ॥
प्रणोद्यस्तदयं भूपः शिष्यवृते भगवन्मया ॥ ९

परोपकरणं नाम साधूनां व्रतमाहितम् ॥
विशेषतः प्रणोद्यानां शिष्यवृत्तिमुपेयुषाम् ॥ १०

अप्रणोद्येषु ~~पने~~ पापेषु साधु प्रोक्तम संशयम् ॥
विद्वेषं मरणं चापि कुरुतेऽन्यतरस्य च ॥ ११

अप्रमत्तः[1] प्रणोद्येषु मुनिरेषा प्रयच्छति ॥
तदेवेति[2] भवानेवं धर्मं वेत्ति कृतोवयम् ॥ १२

लोमश[3] उवाच ॥
कूर्म युक्तमिदं सर्वं त्वयाभिहितमद्य नः ॥
धर्मशास्त्रोपनतं तत्स्मारिताः स्म पुरातनम् ॥ १३

ब्रूहि राजन्सुविश्रब्धं सन्देहं त्वदयस्थितम् ॥
कस्ते किमब्रवीच्छेषं वक्ष्याम्यहं न संशयः ॥ १४

---

१ अ. अप्रदत्तं
२ ब. तमेवेती
३ ब. प्रती "उवाच" नास्ति ।

इन्द्रद्युम्न उवाच ।।

भगवन्प्रथमः प्रश्नस्तावदेव ममोच्यताम् ।।
ग्रीष्मकालेऽपि मध्यस्थे रवौ किं न तवाश्रमः ।। १५

कुटीमात्रोऽपि यच्छाया तृणैः ~~किन्ति~~ शिरसि पाणिगैः ।। १६

लोमश उवाच ।।

मर्तव्यमस्त्यवश्यं च काय एष पतिष्यति ।।
कस्यार्थे क्रियते गेहमनित्यभवमध्यगैः ।। १७

यस्य मृत्युर्भवेन्मित्रं पीतं वाऽमृतमुत्तमम् ।।
तस्यै तदुचितं वक्तमिदं मेश्वौ भविष्यति ।। १८

इदं युगसहस्रेषु भविष्यमऽभवद्दिनम् ।।
तदप्यद्य त्वमापन्नं का कथा मरणावधेः ।। १९

कारणानुगतं कार्यमिदं शुक्रादभू[1]द्भूष्णुः ।।
कथं विशुद्धिमायाति क्षालितांगारवद्बुद ।। २०

तदस्यापि कृते पापं शत्रुवर्गं निर्जिताः ।।
कथंकारं न लज्जन्ते कुवाणां नृपसत्तम[2] ।। २१

---

१ ओ.ब. ------द्भुषुः
२ अ. ब. "नृपसत्तमा"

तद्ब्रह्मण इहोत्पन्नः सिकताद्वयसम्भवः ।।
निगमोक्तं पठञ्छृण्वन्निदं जीविष्यते कथम् ।। २२

तथापि वैष्णवी माया मोहयत्यविवेकिनम् ।।
त्वदकस्थं न जानंति ह्यपि मृत्युंशतायुषः ।। २३

दन्ताश्चवलाश्चवला लक्ष्मीर्यौवनं जीवितं नृप ।।
चलाचलमती वेदं दानमेवं गृहं नृणाम् ।। २४

इति विज्ञाय संसारमसारं च चलाचलम् ।।
कस्यार्थे क्रियते राजन्कुटजादि परिग्रहः ।। २५

इन्द्रद्युम्न उवाच ।।
चिरायुर्भगवाने व श्रूयते भुवनत्रये ।।
तदर्थमहमायातस्तत्किमेवं वचस्तव ।। २६

लोमश उवाच ।।
प्रतिकल्पं मच्छरीरादेक रोम परिक्षयः ।।
जायते सर्वनाशे च मम भावि प्रमाणाम् ।। २७

पश्यजानु प्रदेशं[1] मे द्व्यंगुलं रोमवर्जितम् ।।
जातं वपुस्तद् बिभेमि मर्तव्ये सति किं गृहैः[2] ।। २८

---

१ ब. प्रदेशी
२ ब. ग्रहैः

नारद उवाच ।।

इत्थं निशम्य तद्वाक्यं स प्रहस्याति विस्मितः ।।
भूपालस्तस्य पप्रच्छ कारणं तादृशायुषः ।। २९

इन्द्रद्युम्न उवाच ।।

पृच्छामि त्वामहं ब्रह्मन्य दायुरिदमीदृशम् ।।
तव दीर्घं प्रभावो/सौ दानस्य तपसौ थवा ।। ३०

लोमश उवाच ।।

श्रृणु भूप प्रवक्ष्यामि पूर्वजन्म समुद्भवाम् ।।
शिवधर्मयुतां पुण्यां कथां [1]पापप्रणाशनीम् ।। ३१

अहमासं पुरी शूद्रो दरिद्रो/तीव भूतले ।।
भ्रमामि वसुधापृष्ठे ह्यशनापीडितो भृशम् ।। ३२

ततो मया महल्लिंग जालिमध्यगतं तदा ।।
मध्याह्ने/स्य जलाधारो दृष्टश्चैवा विदूरतः ।। ३३

ततः प्रविश्य तद्वारि पीत्वा स्नात्वा च शांभवम् ।।
तल्लिंगं स्नापितं पूजा विहिता कमलैः शुभैः ।। ३४

अथ क्षुत्क्षामकंठो/हं श्रीकंठं तं नमस्य च ।।
पुनः प्रचलितो मार्गे प्रमीतो नृपसत्तम् ।। ३५

---

१ अ. प्रतौ "श्रवणमात्रतः" इतिस्यात् ।

ततो/हं ब्राह्मणगृहे जातो जातिस्मरः सुतः ।।
स्नापनाच्छिवलिंगस्य सकृत्कमल अ पूजनात् ।। ३६

P/Th 3927-1

स्मरन्विलसितं मिथ्या सत्याभासमिदं जगत् ।।
अविद्यामयमित्येवं ज्ञात्वा मूकत्वमास्थितः ।। ३७

तेन[1] विप्रेण[2] वार्धक्ये समाराध्य महेश्वरम् ।।
प्राप्तो/हमिति मे नाम ईशान इति[3]कल्पितम् ।। ३८

ततः स विप्रो वात्सल्याद गदान्सुबहून्मम् ।।
चकारव्यपनेष्यामि मूकत्वमिति निश्चयः ।। ३९

मंत्रवादान्बहून्वैद्यानुपाया नपरानपि ।।
पित्रोस्तथा महामाया संबद्ध मनसोस्तथा ।। ४०

निरीक्ष्य मूढतां हास्यमासीन्मनसि मे तदा ।।
तथा[4] यौवनमासाद्य निशि हित्वा निजं[5]गृहम् ।। ४१

संपूज्य कमलैः शंभुंततः शयनमभ्यगाम् ।।
ततः प्रमीते पितरि मूढइत्यहमुज्झितः ।। ४२

---

१ ब. तन

२ ब. मित्रेण

३ अ. मिति

४ अ. ततो

५ अ. ब. निजा

151

संबंधिभिः प्रतीतो ऽथ ~~क्षत्र~~ फलाहारमवस्थितः ।।
प्रतीतः पूजयामीशम जैर्बहुविधैस्तथा ।। ४३

अथ वर्षशतस्यान्ते वरदः शशि [1]शेखरः ।।
प्रत्यक्षो याचितोदेहि जरामरणसंक्षयम् ।। ४४

ईश्वर उवाच ।।
अजरामरता नास्ति नामरूप भूतोयतः [2]।।
ममापि देहपातः स्यादवधिं कुरु जीविते ।। ४५

इति शंभोर्वचः श्रुत्वा मया वृतमिदं तदा ।।
कल्पांते रोमपातो ऽस्तु मरणं सर्व संक्षये ।। ४६

ततस्तव गणो भूयामिति मे ऽभीप्सितोवरः ।।
तथेत्युक्त्वा स भगवानुहरश्चादर्शनं गतः ।। ४७

अहं तपसि निष्ठश्च ततः प्रभृति चाभवम् ।।
ब्रह्महत्यादिभिः [3]पापैर्मुच्यते शिवपूजनात् ।। ४८

ब्रघ्नाब्जैरितरैर्वापि कल्मषैर्नात्र संशयः ।।
एवं कुरु महाराज त्वमप्याप्स्यसि वांछितम् ।। ४९

---

१ ब ....... शोष्मरः
२ ब. ~~भ~~ धृतोयतः
३ अ. प्रतौ "महापापै"-----

हरभक्तस्य लोकस्य ~~किं~~ त्रिलोक्यां नास्ति दुर्लभम् ।।
बहिः प्रवृत्तिं संगृह्य ज्ञान कर्मेन्द्रियादि[1] च ।। ५०

लयः सदा शिवे नित्यमंतर्यो गो) यमुच्यते ।।
दुष्करत्वाद्बहिर्योगं शिवएव स्वयं जगौ ।। ५१

पंचमिश्रवार्चनं भूतिर्विशिष्टफलदं ध्रुवम् ।।
क्लेशकर्मविपाकाद्यै राशयैश्रवाप्य संयुतम् ।। ५२

ईशानमाराध्य जपन्प्रणवं[2] मुक्तिमान्पुयात् ।।
सर्वपापक्षये जाते शिवे[3] भवति भावना ।। ५३

पापो पहतबुद्धीनां शिवे वार्तापि दुर्लभा ।।
दुर्लभं भारते जन्म दुर्लभं शिवपूजनम् ।। ५४

दुर्लभं जाहनवीस्नानं शिवेभक्तिः सुदुर्लभा ।।
दुर्लभं ब्राह्मणे दानं दुर्लभं वह्निपूजनम् ।। ५५

अल्प पुण्यैश्रवं पुष्प्रापं पुरुषोत्तम ब्र पूजनम् ।। ५६

---

१ अ. ब. कर्मेन्द्रियाणि
२ ब. जपन् प्रण
३ अ. ब. शिव

लक्षेण धनुषां योगस्तदर्धेन हुताशनः ।।
पात्रं शतसहस्त्रेण रेवा[1] रुद्रश्रेष्ठि षाष्टिभिः ।। ५७

इतीदमुक्तमखिलं मया तव महीपते ।।
यथाकुरभवद्दीर्घं समाराध्य महेश्वरम् ।। ५८

न दुर्लभं न दुष्प्रापं न चासाध्यं महात्मनाम् ।।
शिवभक्ति कृतां पुंसां त्रिलोक्यामिति निश्चितम् ।। ५९

नंदीश्वरस्य तेनैव वपुषा शिवपूजनात् ।।
सिद्धिमालोक्य को राजन्शंकरं न नमस्यति ।। ६०

श्वेतस्य[2] च महीपस्य श्रीकंठं च नमस्यतः ।।
कालोपि प्रलयं यातः कस्तमीशं न पूजयेत् ।। ६१

यदिच्छया विश्वमिदं जायते व्यवतिष्ठते ।।
तथा संलीयते[3] चांते कस्तं न शरणं व्रजेत् ।। ६२

[4]एतद्रहस्यमिदमेव नृणां प्रधानं कर्तव्यमत्र शिवपूजनमेव भूप।।
यस्यांतरायपदवीमुपयांति लोकाः सद्यो नरः शिवनतः
शिवमेति सत्यम् ।। ६३

[5] इति श्री स्कांदे -----लोमशवृतान्ते शिवपूजनमाहात्म्यवर्णनं
नाम द्वादशोऽध्यायः ॥

---

१ अ. सेवा २ ब. श्वेतस्य ३ अ. ब. संजायते
४ ब. एतत्
५ अ. इति श्री स्कंदपुराणे महीमाहात्म्ये लोमश वाक्यं शिवपूजाफल।
ब. इति श्री स्कंद पुराणे महीप्रादुर्भावे द्वादशोध्याय:।। १२ ।।